श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

### चतुःपञ्चाशः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीसीतारामाभ्यां नमः

श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## चतुःपञ्चाशः सर्गः

*लङ्काया दहनं रक्षसां विलापश्च*

वीक्षमाणस्ततो लङ्कां कपिः कृतमनोरथः।
वर्धमानसमुत्साहः कार्यशेषमचिन्तयत्॥ ५.५४.१ ॥

किं नु खल्ववशिष्टं मे कर्तव्यमिह साम्प्रतम्।
यदेषां रक्षसां भूयः सन्तापजननं भवेत्॥ ५.५४.२ ॥

वनं तावत् प्रमथितं प्रकृष्टा राक्षसा हताः।
बलैकदेशः क्षपितः शेषं दुर्गविनाशनम्॥ ५.५४.३ ॥

दुर्गे विनाशिते कर्म भवेत् सुखपरिश्रमम्।
अल्पयत्नेन कार्येऽस्मिन् मम स्यात् सफलः श्रमः॥ ५.५४.४ ॥

यो ह्ययं मम लाङ्गूले दीप्यते हव्यवाहनः।
अस्य सन्तर्पणं न्याय्यं कर्तुमेभिर्गृहोत्तमैः॥ ५.५४.५ ॥

ततः प्रदीप्तलाङ्गूलः सविद्युदिव तोयदः।
भवनाग्रेषु लङ्काया विचचार महाकपिः॥ ५.५४.६ ॥

गृहाद् गृहं राक्षसानामुद्यानानि च वानरः।
वीक्षमाणो ह्यसन्त्रस्तः प्रासादांश्च चचार सः॥ ५.५४.७ ॥

अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम्।
अग्निं तत्र विनिक्षिप्य श्वसनेन समो बली॥ ५.५४.८ ॥

ततोऽन्यत् पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान्।
मुमोच हनुमानग्निं कालानलशिखोपमम्॥ ५.५४.९ ॥

वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः।
शुकस्य च महातेजाः सारणस्य च धीमतः॥ ५.५४.१० ॥

तथा चेन्द्रजितो वेश्म ददाह हरियूथपः।
जम्बुमालेः सुमालेश्च ददाह भवनं ततः॥ ५.५४.११ ॥

रश्मिकेतोश्च भवनं सूर्यशत्रोस्तथैव च।
ह्रस्वकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः॥ ५.५४.१२ ॥

युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य रक्षसः।
विद्युज्जिह्वस्य घोरस्य तथा हस्तिमुखस्य च॥ ५.५४.१३ ॥

करालस्य विशालस्य शोणिताक्षस्य चैव हि।
कुम्भकर्णस्य भवनं मकराक्षस्य चैव हि॥ ५.५४.१४ ॥

नरान्तकस्य कुम्भस्य निकुम्भस्य दुरात्मनः।
यज्ञशत्रोश्च भवनं ब्रह्मशत्रोस्तथैव च॥ ५.५४.१५ ॥

वर्जयित्वा महातेजा विभीषणगृहं प्रति।
क्रममाणः क्रमेणैव ददाह हरिपुङ्गवः॥ ५.५४.१६ ॥

तेषु तेषु महार्हेषु भवनेषु महायशाः।
गृहेष्वृद्धिमतामृद्धिं ददाह कपिकुञ्जरः॥ ५.५४.१७ ॥

सर्वेषां समतिक्रम्य राक्षसेन्द्रस्य वीर्यवान्।
आससादाथ लक्ष्मीवान् रावणस्य निवेशनम्॥ ५.५४.१८ ॥

ततस्तस्मिन् गृहे मुख्ये नानारत्नविभूषिते।
मेरुमन्दरसङ्काशे नानामङ्गलशोभिते॥ ५.५४.१९ ॥

प्रदीप्तमग्निमुत्सृज्य लाङ्गूलाग्रे प्रतिष्ठितम्।
ननाद हनुमान् वीरो युगान्तजलदो यथा॥ ५.५४.२० ॥

श्वसनेन च संयोगादतिवेगो महाबलः।
कालाग्निरिव जज्वाल प्रावर्धत हुताशनः॥ ५.५४.२१ ॥

प्रदीप्तमग्निं पवनस्तेषु वेश्मसु चारयन्।
तानि काञ्चनजालानि मुक्तामणिमयानि च॥ ५.५४.२२ ॥

भवनानि व्यशीर्यन्त रत्नवन्ति महान्ति च।
तानि भग्नविमानानि निपेतुर्वसुधातले॥ ५.५४.२३ ॥

भवनानीव सिद्धानामम्बरात् पुण्यसङ्क्षये।
सञ्जज्ञे तुमुलः शब्दो राक्षसानां प्रधावताम्॥ ५.५४.२४ ॥

स्वे स्वे गृहपरित्राणे भग्नोत्साहोज्झितश्रियाम्।
नूनमेषोऽग्निरायातः कपिरूपेण हा इति॥ ५.५४.२५ ॥

क्रन्दन्त्यः सहसा पेतुः स्तनन्धयधराः स्त्रियः।
काश्चिदग्निपरीताङ्ग्यो हर्म्येभ्यो मुक्तमूर्धजाः॥ ५.५४.२६ ॥

पतन्त्योरेजिरेऽभ्रेभ्यः सौदामन्य इवाम्बरात्।
वज्रविद्रुमवैदूर्यमुक्तारजतसंहतान्॥ ५.५४.२७ ॥

विचित्रान् भवनाद्धातून् स्यान्दमानान् ददर्श सः।
नाग्निस्तृप्यति काष्ठानां तृणानां च यथा तथा॥ ५.५४.२८ ॥

हनूमान् राक्षसेन्द्राणां वधे किञ्चिन्न तृप्यति।
न हनूमद्विशस्तानां राक्षसानां वसुन्धरा॥ ५.५४.२९ ॥

हनूमता वेगवता वानरेण महात्मना।
लङ्कापुरं प्रदग्धं तद् रुद्रेण त्रिपुरं यथा॥ ५.५४.३० ॥

ततः स लङ्कापुरपर्वताग्रे
  समुत्थितो भीमपराक्रमोऽग्निः।
प्रसार्य चूडावलयं प्रदीप्तो
  हनूमता वेगवतोपसृष्टः॥ ५.५४.३१ ॥

युगान्तकालानलतुल्यरूपः
  समारुतोऽग्निर्ववृधे दिवस्पृक्।

विधूमरश्मिर्भवनेषु सक्तो
रक्षः शरीराज्यसमर्पितार्चिः॥ ५.५४.३२ ॥

आदित्यकोटीसदृशः सुतेजा
लङ्कां समस्तां परिवार्य तिष्ठन्।
शब्दैरनेकैरशनिप्ररूढै-
र्भिन्दन्निवाण्डं प्रबभौ महाग्निः॥ ५.५४.३३ ॥

तत्राम्बरादग्निरतिप्रवृद्धो
रूक्षप्रभः किंशुकपुष्पचूडः।
निर्वाणधूमाकुलराजयश्च
नीलोत्पलाभाः प्रचकाशिरेऽभ्राः॥ ५.५४.३४ ॥

वज्री महेन्द्रस्त्रिदशेश्वरो वा
साक्षाद् यमो वा वरुणोऽनिलो वा।
रौद्रोऽग्निरर्को धनदश्च सोमो
न वानरोऽयं स्वयमेव कालः॥ ५.५४.३५ ॥

किं ब्रह्मणः सर्वपितामहस्य
लोकस्य धातुश्चतुराननस्य।
इहागतो वानररूपधारी
रक्षोपसंहारकरः प्रकोपः॥ ५.५४.३६ ॥

किं वैष्णवं वा कपिरूपमेत्य
रक्षोविनाशाय परं सुतेजः।
अचिन्त्यमव्यक्तमनन्तमेकं
स्वमायया साम्प्रतमागतं वा॥ ५.५४.३७ ॥

इत्येवमूचुर्बहवो विशिष्टा
रक्षोगणास्तत्र समेत्य सर्वे।
सप्राणिसङ्घां सगृहां सवृक्षां
दग्धां पुरीं तां सहसा समीक्ष्य॥ ५.५४.३८ ॥

ततस्तु लङ्का सहसा प्रदग्धा
　　सराक्षसा साश्वरथा सनागा।
सपक्षिसङ्घा समृगा सवृक्षा
　　रुरोद दीना तुमुलं सशब्दम्॥ ५.५४.३९ ॥

हा तात हा पुत्रक कान्त मित्र
　　हा जीवितेशाङ्ग हतं सुपुण्यम्।
रक्षोभिरेवं बहुधा ब्रुवद्भिः
　　शब्दः कृतो घोरतरः सुभीमः॥ ५.५४.४० ॥

हुताशनज्वालसमावृता सा
　　हतप्रवीरा परिवृत्तयोधा।
हनूमतः क्रोधबलाभिभूता
　　बभूव शापोपहतेव लङ्का॥ ५.५४.४१ ॥

ससम्भ्रमं त्रस्तविषण्णराक्षसां
　　समुज्ज्वलज्ज्वालहुताशनाङ्किताम्।
ददर्श लङ्कां हनुमान् महामनाः
　　स्वयम्भुरोषोपहतामिवावनिम्॥ ५.५४.४२ ॥

भङ्क्त्वा वनं पादपरत्नसङ्कुलं
　　हत्वा तु रक्षांसि महान्ति संयुगे।
दग्ध्वा पुरीं तां गृहरत्नमालिनीं
　　तस्थौ हनूमान् पवनात्मजः कपिः॥ ५.५४.४३ ॥

स राक्षसांस्तान् सुबहूंश्च हत्वा
　　वनं च भङ्क्त्वा बहुपादपं तत्।
विसृज्य रक्षोभवनेषु चाग्निं
　　जगाम रामं मनसा महात्मा॥ ५.५४.४४ ॥

ततस्तु तं वानरवीरमुख्यं
　　महाबलं मारुततुल्यवेगम्।

www.prapatti.com

महामतिं वायुसुतं वरिष्ठं
प्रतुष्टुवुर्देवगणाश्च सर्वे॥ ५.५४.४५ ॥

देवाश्च सर्वे मुनिपुङ्गवाश्च
गन्धर्वविद्याधरपन्नगाश्च।
भूतानि सर्वाणि महान्ति तत्र
जग्मुः परां प्रीतिमतुल्यरूपाम्॥ ५.५४.४६ ॥

भङ्क्त्वा वनं महातेजा हत्वा रक्षांसि संयुगे।
दग्ध्वा लङ्कापुरीं भीमां रराज स महाकपिः॥ ५.५४.४७ ॥

गृहाग्र्यशृङ्गाग्रतले विचित्रे
प्रतिष्ठितो वानरराजसिंहः।
प्रदीप्तलाङ्गूलकृतार्चिमाली
व्यराजतादित्य इवार्चिमाली॥ ५.५४.४८ ॥

लङ्कां समस्तां सम्पीड्य लाङ्गूलाग्निं महाकपिः।
निर्वापयामास तदा समुद्रे हरिपुङ्गवः॥ ५.५४.४९ ॥

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
दृष्ट्वा लङ्कां प्रदग्धां तां विस्मयं परमं गताः॥ ५.५४.५० ॥

तं दृष्ट्वा वानरश्रेष्ठं हनूमन्तं महाकपिम्।
कालाग्निरिति सञ्चिन्त्य सर्वभूतानि तत्रसुः॥ ५.५४.५१ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुःपञ्चाशः सर्गः॥

www.prapatti.com